॥ ओ३म् ॥
अप्युन्मत्तात्प्रलपतो बालाच्च परिजल्पत:।
सर्वत: सारमादद्यादश्मभ्य इव काञ्चनम॥
य एव यत्न: क्रियते परराष्ट्रविमर्दने।
स एव यत्न: कर्तव्य: स्वराष्ट्रपरिपालने॥
(विदुरनीति)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23

Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१

ई-मेल: sanskritsamvad@gmail.com वेबसाइट: www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
यस्मात्त्रस्यन्ति भूतानि मृगव्याधान्मृगा इव।
सागरान्तामपि महीं लब्ध्वा स परिहीयते॥
पितृ पितामहं राज्यं प्राप्तवान्स्वेन कर्मणा।
वायुरभ्रमिवासाद्य भ्रंशयत्यनये स्थित:॥
(विदुरनीति)

卐 वर्षम्-१२ 卐 अंक:-२० (२८४) नवदेहली 卐 १६ अप्रैलमास: २०२३त: ३० अप्रैलमास: २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## राष्ट्रविकासाय अर्थशक्ति: ज्ञानशक्तिश्च महत्त्वपूर्णे

वाराणसी। पूर्वं भारते सैन्य शक्ति: आसीत् अधुना समयपरिवर्तनेन ज्ञानशक्ति: आगता। ज्ञानशक्ते: वर्धने विश्वविद्यालयस्य भूमिका महत्वपूर्णेति कथनं सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य



66तमे स्थापनोत्सवे पूर्वाह 10 वादने, पाणिनि भवन सभागारे विश्वविद्यालयस्यास्य भारतीय ज्ञान परम्परा केन्द्रस्य उत्तर प्रदेश संस्कृत संस्थानस्य च संयुक्त तत्वावधाने अखिल भारतीय अष्टावधान कार्यक्रमस्य विंशतिवर्षेभ्य: परं जायमानमस्ति आयोजनं तत्र मुख्य: अतिथि: महर्षि पाणिनि संस्कृत एवं च वैदिक विवि उज्जैनस्य कुलपति: प्रो विजय कुमार मेनन: उक्तवान। विशिष्ट: अतिथि: पूर्व कुलपति: अन्तरराष्ट्रीय कवि: पद्मश्री: प्रो अभिराज राजेन्द्र मिश्र:

शेषभाग:पंचमपुटे

## गीता योगविद्याय: सर्वसमादृत: उपदेशग्रन्थो वर्तते

वृत्तप्रेषक: डॉ. उमाकान्तशुक्ल:

चातुर्वेद-संस्कृतप्रचार-संस्थानद्वारा प्रत्येकमेकादश्यां तिथौ देशस्य भिन्न-भिन्नविश्वविद्यालयै: महाविद्यालयै: सह सम्मिल्य पाक्षिकी श्रीमद्भगवद्गीता राष्ट्रियव्याख्यानगोष्ठी समायोज्यते। सम्प्रति वैशाखकृष्णैकादश्यां रविवासरे संस्कृतविभाग-कलासंकाय-काशीहिन्दूविश्वविद्यालय:




वाराणसी, श्रीभरतसंस्कृतमहाविद्यालय: छपरा बिहार: इत्येतेषां संयुक्ततत्वावधाने गोष्ठ्या अष्टम: पर्याय: सुसम्पन्नोभूत। अत्र विशिष्टवक्तारूपेण काशीहिन्दूविश्वविद्यालयत: प्रो.सदाशिवद्विवेदी वर्य: आसीत। महोदय: 'वर्तमानपरिप्रेक्ष्ये गीतोपदिष्टयोगविद्याविमर्श:' इति विषयमादय प्रोवाच यत् गीता योगविद्याया: सर्वजनग्राह्य:, सरल:, सर्वसमादृतश्च ग्रन्थो विद्यते। योगी क:? इति जिज्ञासायाम् आहार-विहार-चेष्टा-दिनचर्यादिभि: समन्वितो व्यवस्थितो वा योगी भवति। तस्य कृते च फलदायिनी भवति उक्तमपि भगवता श्रीकृष्णेन

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दु:खहा॥**

वर्तमान परिप्रेक्ष्ये शारीरिक-बौद्धिक-मानसिकादि शान्तये गीताया योगविद्या श्रेयस्करी वर्तते। यतोहि योगेनैव वाह्यविषयेभ्य: इन्द्रियाणि परावृतो भूत्वा शरीरस्थात्मतत्त्वेन सम्बद्धानि भवन्ति। एवं बहुविधोदाहरणप्रत्युदाहरणादिभि: गीताप्रतिपादितं योगविद्यास्वरूप प्रत्यपादयत्।

शेषभाग:तृतीयेपुटे

## 'रामायण- तत्त्व- चिन्तनम्' विषयोऽपरि त्रैभाषिकी राष्ट्रिया वेब-गोष्ठी

-डा. नरेन्द्रनाथठक्कुर:

सहर्षं संसूच्यते यत् देवघर फाउण्डेशन इत्याख्याया: सांस्कृतिक-शैक्षणिक-संस्थाया: सांस्कृतिक-प्रकोष्ठेन रामायण-तत्त्व-चिन्तनम् इतिविषयमुरीकृत्य दिनत्रयात्मक: अंतर्जालीय प्रकल्प: अनुष्ठित:। प्रकल्पारम्भ: पंचदशे दिनांके रामायण-तत्त्व-चिन्तनम् इति विषयोपरि राष्ट्रिय-त्रैभाषिकी-वेब-गोष्ठी गूगल-मीट इति साधनेन समायोजिता। यस्या: आध्यक्ष्यं संस्थाध्यक्षेण श्रीमता डॉ. नरेन्द्रनाथ ठक्कुरेण विहितम्। कामेश्वर-सिंह-दरभंगा-संस्कृत-विश्वविद्यालयस्य



यशस्विन: कुलपतय: प्रो. शशिनाथ-झा-महाशया: अस्यां गोष्ठ्यां मुख्यातिथय: आसन्।

विशिष्टातिथिरूपेण बनारस-हिन्दू-विश्वविद्यालयस्य धर्मविद्याविज्ञानसङ्कायस्य व्याकरणविभागाध्यक्षा: प्रो. भगवत्-शरण-शुक्ल-महाभागा: सभामलंकृतवन्त:। सारस्वता- तिथिरूपेण पटना विश्वविद्यालयस्य संस्कृत-विभागाध्यक्षा: प्रो. लक्ष्मीनारायण-महोदया: विश्वभारती-शांतिनिकेतन-विश्वविद्यालयस्य अध्यक्षचरा: प्रो. अरुण-कुमार-मण्डल-वर्या: डॉ. रजनी-रमण-झा-महाभागाश्च कार्यक्रमे उपस्थिता: आसान्।

वेब-गोष्ठ्याम् आसेतुहिमाचलम् अनेकराज्येभ्य: शोधार्थिन: रामायण-तत्त्व-चिन्तन-विषयमन्तरा बहुविधोपविषयेषु स्वपत्राणि प्रस्तुतवन्त:।

विशेषाशीर्वचनं दातुं भारत-सर्वकारस्य भाषा-आयोग-सदस्या: बिहार-राज्यस्य सिंचन-मन्त्रीचरा: श्रीमन्त: कृष्णानन्द झा-महाशया: देवघर-महाविद्यालयस्य प्राचार्यचरा: प्रो. ताराचरण खवाड़े-वर्या: शिक्षाविभागस्य पूर्व-शिक्षाधिकारिण: डॉ. मोतीलाल-द्वारी-महाभागाश्च प्रार्थिता: उपस्थिताश्चासन्। सभायां डॉ. कौशिकमिश्रमहोदयस्य कविताावाचनं मानसमर्मज्ञस्य राजकुमार-हिम्मत-सिंहका-वर्यस्य उद्बोधनं च आह्लादकरमासीत्। सर्वेषां अतिथीनामनुग्रहभाषणं रामायण-विषये श्रोतृगणस्य ज्ञानलाभाय समभवत। कार्यकर्मस्य सफलतायै संस्थाया: संस्थापक: आनंदकुमारवर्य:, उदयनारायण-खवाड़े-वर्य: लक्ष्मीकान्तमिश्रवर्य:, डॉ. लाला-शंकर-गयावालवर्य: विनयनारायणवर्य:, राजदेव-मिश्र-वर्य:, चन्दन-चटर्जी-वर्य:, रूपेशमिश्र-वर्य:, सोमेश-पण्डित-वर्य: अन्ये च संस्था-सदस्या: बहुपरिश्रमं योगदानं च कृतवन्त:।

द्वितीये दिने प्राप्त-शोध-पत्राणां संशोधनं रामायणविषये शोधावसरा: इति विषये च संस्थासदस्या: गाढालोचनं कृतवन्त:, अष्टादशे दिनांके च प्रमाणपत्रवितरणेन सार्धं प्रकल्पौयं सम्पन्नतामगात्।

कार्यकर्मस्य सम्पूर्णं संचालनं संस्थाया: सांस्कृतिक: सचिव: सोमेश काश्यप: उपाध्यक्षेण डॉ परशुराम-तिवारीवर्येण साकमकरोत्।

## प्रोफेसर-श्रीकिशोरमिश्रमहोदया: कलासंकायस्य अध्यक्षा: नियुक्ता:



काशीहिन्दूविश्वविद्यालयस्य कलासंकायस्य संस्कृतविभागस्य पूर्वाध्यक्षा: महर्षिसान्दीपनिराष्ट्रियवेदविद्यापीठस्यपूर्वसचिवा: निगमागमादिशास्त्रनिष्णाता: शिष्यप्रिया: आचार्या: श्रीकिशोरमिश्रमहोदया: अप्रैलमासस्य नवमदिनांके काशीहिन्दूविश्वविद्यालयस्य कुलपतिना कलासंकायस्य अध्यक्षा: नियुक्ता:। ज्ञातव्यमस्ति यत् संकायेऽस्मिन् द्वाविंशति:विभागा: सन्ति । काशीहिन्दूविश्वविद्यालयस्य श्कला संकाय: मातृसंकाय: इत्युच्यते। संकायेऽस्मिन् भारताध्ययनकेन्द्रप्रभृतयस्त्रीणि केन्द्राण्यपि विधि वद्विलसन्ति।

## अखिलभारतीयशास्त्रीयस्पर्धायां पाणिनिसंस्कृतविश्वविद्यालयस्य छात्रेण श्रीउद्धवपौराणिकेन रजतपदकं लब्धम्

(वृत्तप्रेषकः डॉ.दिनेशः चौबे)



नवदेहलीस्थकेंद्रीयसंस्कृत विश्वविद्यालयस्य तत्वावधाने काश्यायाम् आयोजितायाम् अखिलभारतस्तरीय शास्त्रीयप्रतियोगितायाम् उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य न्यायदर्शनविभागस्य छात्रेणश्री उद्धवपौराणिकेन न्यायभाषण प्रतियोगितायां गदाधरीयपञ्च लक्षण्यां द्वितीयलक्षणेसाध्य भावादिकर्णत्वं केनसम्बन्धेन इतिविषये द्वितीयस्थानं रजतपदकं च् प्राप्तम्। अस्यां प्रतियोगितायां आभारतात् नाना संस्थाभ्यः समागताः छात्राः भागं वहन्ति । प्रदेशस्तरे चिताः छात्राः एव अत्र भागं स्वीकुर्वन्ति। अस्मिन् अवसरे विश्वविद्यालयस्य मान्यःकुलपतिः आचार्यविजयकुमारसीजीवर्यः उपस्थितः आसीत् तेनोक्तं यत् विश्वविद्यालयस्य छात्राणां प्रदर्शनं उत्तमम् आसीत् अस्माकं छात्राःसर्वत्र सर्वविधासु प्रतियोगितासु स्वप्रातिभं प्रदर्शितवन्तः पदकानि च अर्जितानि। कुलपतिवर्येण छात्राणाम् आचार्याणाञ्च अभिनंदनं कृतम् । एवञ्च विश्वविद्यालयस्य नीताशर्मा, शिवांशशुक्लः, अवनीशशर्मा, वैदिकजोशीभिः छात्रैः विविधासु स्पर्धासु प्रतिभागं कृतवन्तः। अवसरेस्मिन् संस्कृतविश्वविद्यालयस्य कुलपतयः, विद्वांसः आचार्याः ,छात्राः, अन्यजनाश्च उपस्थिताः आसन्।




## 126 संस्कृतशिक्षकाणां मानदस्य विषयः शीघ्रमेव मन्त्रिमण्डले आगमिष्यति

देहरादून। बहुवर्षेभ्यः संस्कृतविद्यालयेषु महाविद्यालयेषु च अध्यापनं कुर्वन्तः १२६ शिक्षकाः मानदेयदानसम्बद्धः विषयः शीघ्रमेव मन्त्रिमण्डले आनयिष्यते।

शिक्षा-संस्कृतशिक्षामन्त्री डॉ.धनसिंहरावतः स्वनिवासस्थाने आयोजिते संघनेतृणां अधिकारिणां



च समूहसभायां एतत् प्रकटितवान्, सः अवदत् यत् यथा यथा तस्य समीपं गतं, तथैव 126 शिक्षकाः संस्कृतविद्यालयेषु महाविद्यालयेषु च 126 यावत् अध्यापनं कुर्वन्ति तेषु १५५ शिक्षकान् सम्प्रति मन्त्रिमण्डलस्य अनुशंसया मानदं प्रदत्तं भवति, अधुना तस्यां सूच्यां मानदेयविहीनानां १२६ शिक्षकाणां विषयः अपि मन्त्रिमण्डले आनयन् शीघ्रमेव समाधानं प्राप्स्यति।

संस्कृतशिक्षाविभागे अनेकानि ऐतिहासिकपदानि गृह्यन्ते, यथा छात्राणां शोधार्थं छात्रवृत्तिः, संस्कृत-अकादमीद्वारा शिक्षकाणां व्यवस्था, १३ जिल्हेषु आदर्शसंस्कृतग्रामाणां स्थापना च, अद्यत्वे सभा विशेषतया लम्बितप्रकरणानाम् समाधानार्थम् शिक्षकैः, अधिकारिभिः शिक्षकप्रतिनिधिभिः च सह कृतम् अस्ति, यत् शीघ्रमेव सकारात्मकं परिणामं दास्यति।

सभायां संस्कृतशिक्षासचिवः आईएएस चन्द्रेशयादवः, खण्डाधिकारी राजीवनयनपाण्डेयः, शिक्षाविभागस्य पक्षतः सहायकनिदेशकः डा.चण्डीप्रसादघिल्डियालः, पूर्वशिक्षामन्त्री मन्त्रिप्रसादनैथानी,प्रबन्धशिक्षकसङ्घस्य प्रान्तीयाध्यक्षः जनार्दनकैरवाणः, १२६ शिक्षकसंघाध्यक्षः भगवतीबिजल्वाणः, सूर्यप्रकाशरतूडी, अनूपरावतः,मनोजशर्मा आदयः उपस्थिताः आसन् ।

## पञ्चदशदिवसीयसंस्कृतसम्भाषण-शिबिरस्य समापनं जातम्

मार्चमासस्य ६ दिनाङ्के गुरुवासरे हिन्दूमहाविद्यालये संस्कृतसम्भाषणशिबिरस्य समापनं जातम्। अस्य शिबिरस्य आयोजनं हिन्दूमहाविद्यालयस्य संस्कृतविभागस्य, संस्कृतभारत्याः च संयुक्ततत्वावधाने कृतम् आसीत् । शिबिरेऽस्मिन् १५ दिवसान् यावत् नियमितकक्षाः प्रचलन्ति स्म यासु विस्तारकः मनीषमहोदयः मुख्याध्यापकत्वेन छात्राणां ज्ञानं वर्धयति स्म । समये समये छात्राणां कृते कमलानगरमण्डलस्य प्रचारप्रमुखस्य श्रीअंगिरसमहोदयस्य मार्गदर्शनम् अपि प्राप्यते



स्म । पंकजमहोदयः श्रीकृष्णकान्तसरकारः च शिबिरस्य सहशिक्षकौ आस्ताम् । समापनसत्रे मुख्यातिथिरूपेण संस्कृतभारत्याः उत्तरक्षेत्रमन्त्री तथा श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयस्य प्रो. यशवीरसिंहः, विशिष्टातिथिरूपेण , संस्कृतभारत्याः दिल्लीप्रान्तस्य संगठनमन्त्री विवेककौशिकमहोदयः, अध्यक्षत्वेन दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य प्राध्यापकः प्रो. टेकचन्दमीणामहोदयः एतेषाम् अतिथीनां गरिमामयी उपस्थितिः आसीत्। छात्राः अपि मञ्चे एतावता शिबिरस्य अनुभवान् प्रकटयित्वा संस्कृतगीतानि लघुनाटकानि च मञ्चितवन्तः। हिन्दूमहाविद्यालयस्य संस्कृतविभागस्य वरिष्ठप्राध्यापकाः डॉ. श्रीमान् पूरणमलः, डॉ. श्रीमान् जगमोहनः, डॉ. श्रीमान् राजेन्द्रकुमारः, डॉ. श्रीमान् सोमशंकरः च एतेषां शिबिरसंयोजने महान् प्रयत्नः आसीत्। ऋषभः, सौरभः, ऋतिकः, शुभ्रा, लावण्या, कीर्तिः इत्यादयः छात्राः सत्रेऽस्मिन् समुपस्थिताः आसन्।

**विश्वधरोहरदिवसविशेषः**

## ग्राम्यनिक्षेपं (धरोहरं) रक्षितुं पाणिनिसंस्कृतविश्वविद्यालयस्य अभिनवप्रयासः 'चलत मिलामः ग्राम्यदेहाल्याम्'

(वार्ताहरः डॉ.दिनेशः चौबे )

ग्रामा:अस्माकं संस्कृत्या आत्मा वर्त्तते यतोहि अस्माकं सांस्कृतिकं मूलं ग्रामेषु एव विद्यते। इदानीं ग्राम्यगृहं तत्रत्यं वातावरणं, पर्वाणि अनेकविधानि ग्राम्य धरोहराणि ग्रामेषु सन्ति यानि



अस्माभिःविस्मृतानि । विस्मृयते च । उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य ज्योतिष-ज्योतिर्विज्ञानविभागेन ग्राम्यवास्तुप्रेक्षणपरियोजना आरभते अस्यां परियोजनायां छात्राःशिक्षकाश्च यथासमये विभिन्नेषु ग्रामेषु गत्वा ग्राम्यजनैः सह चर्चा कृत्वा तत्रत्या वास्तुविद्याम्, संस्कृतिं च अवलोक्य रेखाङ्कनं करिष्यन्ति । ग्रामवास्तव्यवृद्धजनानां साक्षात्कारः लघुचलचित्रम् (वीडियो ) छायाचित्रम्,वृत्तचित्राणां निर्माणं पुस्तकसंकलनमित्यादि कार्याणि भविष्यन्ति।

**चल मिले गांव की चौखट पे**

इति शीर्षकान्वितायां परियोजनायां विभागस्य पूर्व-वर्तमान छात्राः भागं ग्रहीतुं शक्नुवन्ति। संप्रति पञ्जीयनम् , ग्रामचयनस्य कार्यं च प्रचलति। ग्रामेभ्यःप्राप्तविवरणानुसारं छात्राः शिक्षकाणां मार्गदर्शने सामग्रीं सम्पादिष्यन्तिति ।एवञ्च पुनः ग्रामं गत्वा संस्कृतशब्दावलीम्, वास्तुशास्त्रस्य प्रामाणिकज्ञानेन ग्राम्यजनान् परिचितं कारयित्वा भारतीयज्ञानपरम्परायाः प्रचारः प्रसारश्च करिष्यन्ति। विश्वकर्माज्यन्त्यावसरे प्रतिवर्षम् उत्कृष्टं छात्रदलं विभागपक्षतः पुरस्कारः अपि प्रदास्यते। विश्वविद्यालयस्य मान्यकुलपतिःआचार्यविजय कुमारसीजीवर्येण उक्तं यत् ज्ञानं केवलं पुस्तकेषु एव न प्राप्यते वास्तुशास्त्रं जीवंतविषयम् अस्ति यत्र प्रत्येकं गृहं , नगरं च प्रयोगशाला वर्त्तते ज्योतिष -ज्योतिर्विज्ञानविभागस्य अयमुपक्रमः राष्ट्रियशिक्षानीति २०२० तथा च मध्यप्रदेश शासनस्य युवनीति इत्यनुसारं विद्यते अयम् एकः उत्तमःप्रयासः अस्ति।कार्यक्रमस्य समन्वयकःज्योतिषविभागप्रमुखः डॉ.शुभम् शर्ममहोदयः अस्ति।

# उज्जयिनीस्थमहर्षिपाणिनि-संस्कृतविश्वविद्यालयेन शैक्षणिकं भ्रमणस्य आयोजनं कृतम्

(वार्ताहरः डॉ.दिनेशःचौबे)

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य ज्योतिषज्योतिर्विज्ञानविभागेन शनिवासरे अष्टतमेदिनाङ्के शैक्षणिकभ्रमणस्य आयोजनं कृतम्। पद्मश्रीः डॉ.विष्णुधरबाकणकरवेधशाला,



डोंगला, उज्जयिनी मण्डलम् इत्यस्थले शैक्षणिकं भ्रमणं जातम् ।भ्रमणावसरे विश्वविद्यालयस्य मान्यकुलपतिः आचार्यविजयकुमारमेननवर्यः उपस्थित:आसीत् ।छात्रै:सह तेन वेधशालायां स्थितं शङ्कुयन्त्रेणदिशाज्ञानम्,पलभा, अक्षांशसाधनम्, भित्तियन्त्रम्, सम्राटयन्त्रम् , नाडीवलययन्त्रम्,




सह अन्यखगोलीयविषयिकाः सूचना:प्राप्ता। अश्मिन्नवसरे वेधशालाया:प्रकल्पाधिकारिः श्रीघनश्यामरत्नानिवर्य:उपस्थितः आसीत्। यस्य मार्गदर्शने छात्रान् खगोलीययन्त्राणां विषये सूचनाः प्रदत्ताः। कुलपतिमहोदयेनोक्तं यत् अनेनायोजनेन छात्राः विषयस्य प्रयोगिकपक्षैः परिचिताः भवन्ति। यतोहि ज्योतिश्शास्त्रपूर्णरूपेण प्रायोगिकम् अस्ति अतः एतादृशेसु आयोजनेसु छात्राणां सहभागम् आवश्यकं वर्तते। अवसरेस्मिन् ज्योतिष ज्योतिर्विज्ञानविभागप्रमुखः डॉ. शुभम् शर्ममहाशयः, डॉ. विजयकुमारः,डॉ.योगेशकुमारः ,डॉ.बबलूमिश्रः,डॉ.विनोदपाण्डेयः, डॉ.अविनाशमिश्रः, डॉ. मुनीष मिश्रादयाः प्राध्यापकाः उपस्थिताः आसन्।

प्रथमपुटस्य शेषभागः **गीता योगविद्यायः सर्वसमादृतः...**

मुख्यवक्ता मध्यप्रदेशस्थ विक्रमविश्वविद्यालयीयः, कुलानुशासकः, कलासङ्कायाध्यक्षश्च प्रो. शैलेन्द्रकुमारशर्ममहोदयः आसीत्। 'सार्वभौमिकधर्मपरिप्रेक्ष्ये श्रीमद्भगवद्गीता' इतिविषयमादाय ज्ञानप्रदं व्याख्यानं प्रदत्तम। तत्रोक्तञ्च विश्ववाङ्मयस्य सर्वोत्तमोपलब्धिः गीता अस्ति। इयं सार्वभौमिकधर्मस्य आधारशिलास्थापको ग्रन्थोस्ति। भगवतः कृष्णस्य समग्रवाणी अस्ति। तैरुक्तं यत् निष्कामभावनया परहितकर्माचरणं सार्वभौमिको धर्मोस्ति। गीता दिक्कालस्थानधर्मव्यक्तिविशेषस्य नैवापितु सार्वभौमिकधर्मस्योपदेशं ददाति। अत एव गीता लौकिकजीवने यावत्यावश्यकी तावत्येव आध्यात्मिकजीवनेपि। धर्मो नाम यः मानवान् पालयति, जीवनं सञ्चालयति। इत्थं भारतीयमनीषायाः व्यापकभूमिकायुता संकल्पना धर्मस्यास्ति। सर्वविधाचरणं धर्मत्वेनापि प्रतिपाद्यते किन्त्वधेयमत्र यत् दुर्योधन-युधिष्ठिरद्वावपि धर्मं सम्पादितवन्तौ किन्तु विजयस्तु युधिष्ठरस्यैव जातः। अधर्ममपि धर्मत्वेन मन्वानः सदा संशयापन्नो भवति, अन्नयान्नपि तथैव सन्निवेशयति। अतः गीताप्रतिपादतो धर्म एव शाश्वतः, सार्वभौमिकः, अचलस्थश्चेति। अचलनीतिर्यत्र तत्रैव श्रीकृष्णो विराजते।

सर्वादौ भीलवाड़ा राजस्थानतः श्री नवनीतपारीकः वैदिकं मङ्गलाचरणं कृतवान्। समन्वयकः डॉ. शरदिन्दुत्रिपाठिवर्यः समुपस्थितानां समेषां विदुषां जिज्ञासूनाञ्च स्वागतवचोभिरभिनन्दनं व्याहृतवान्। ततः आयुष्मती समृद्धि आयुषान् रुद्रांशत्रिपाठनौ गीताश्लोकपाठं कृतवन्तौ। धन्यवादज्ञापनं संयुक्तसंयोजकः डॉ. अम्बरीशकुमारमिश्रः शान्तिपाठं डॉ. शम्भूत्रिपाठी सञ्चालनञ्च डॉ. अरविन्दकुमारतिवारी वर्याः कृतवन्तः। कार्यक्रमं संयोजितवान् डॉ. चन्द्रकान्तदत्तशुक्लः सहायकाचार्यः राजकीय स्नातकोत्तर महाविद्यालयः मुहम्मदाबाद-गोहना मऊ उत्तरप्रदेशः। अवसरेमिन् प्रो. राजेश्वरमिश्रः, प्रो. मञ्जूलताशर्मा, प्रो.रचना शर्मा, प्रो. उमाशंकरत्रिपाठी, डॉ. सुनीता जायसवाल, प्रो.विवेकपाण्डेयः, प्रो.जयपालः, डॉ. पुष्पा त्रिपाठी, डॉ. अवनीन्द्रपाण्डेयः, डा.रामकेश्वरतिवारी, डॉ. पूनमलखनपालः, डॉ. गीताशुक्ला, डॉ. नेहा मिश्रा, डॉ. रामप्रतापमिश्रः, डॉ. आभाद्विवेदी, डॉ. सन्ध्या ठाकुर, अनीता चौहान्, अनन्या श्रीवास्तवा, अंकिता विश्वकर्मा, महकमौर्या, डॉ. अशोककुमारः, जी.एस.चौधरी, गीता जोशी, सङ्गीता मौर्या, डॉ. प्रदीप दीक्षित, प्रिया विश्वकर्मा, ऋषिकान्त उपाध्यायः, निशान्तशुक्लः, डॉ. विमलेन्दु त्रिपाठी, श्री रमेशचन्द्रा, डॉ. राकेश तिवारी, प्रियंका यादव, डॉ. लक्ष्मी सिंह, डॉ. सज्जनपासवानः, डा. श्वेता बरनवालः, डा. बृजेशकुमारः, डॉ.मोहनदासः, राजेन्द्र मायेकरः, डॉ. ममता मेहरा प्रभृतयो नैके विदुष्यो विद्वांसो जिज्ञासवश्च समुपस्थिताः आसन। अग्रिमा गोष्ठी मई मासस्य प्रथमे दिनङ्के भविता।

# सप्तमी श्रीमद्भगवद्गीता पाक्षिक-राष्ट्रीयसंगोष्ठी सम्पन्ना

प्रत्येकादशि समायोज्यमाना राष्टियसंगोष्ठी अप्रैलमासस्य द्वितीयदिनाङ्के संस्कृतविभाग-भाषासाहित्यभवन-गुजरात-यूनिवर्सिटी- अहमदाबाद- गुजरात, राजकीय-महिला-महाविद्यालय-डी.एल. डब्ल्यू. वाराणसी, चातुर्वेद-संस्कृत-संस्थानम्-काशी इत्येतेषां संयुक्ततत्त्वावधाने 'विश्वसंस्कृतकुटुम्बकम्' आमुखपटले सप्तमी' एकादशी श्रीमद्भगवद्गीता पाक्षिकराष्ट्रीय-व्याख्यानसंगोष्ठी सकुशलं सम्पन्नाऽभूत्! अस्यां संगोष्ठ्यां विशिष्टवक्तारः डॉ. कनैया ठाकरमहोदयाः गीतायां नैतिकमूल्यानि विषयमधिकृत्य गभीरं चिन्तनम् अल्पैनैव शब्देन



समुद्घाटितम्। मुख्यवक्तारः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य वेदान्तविभागप्रमुखाः, कुलसचिवा श्चाचार्यरामकिशोरत्रिपाठिनः आसन्! आचार्यत्रिपाठिमहाभागाः तात्त्विकविवेचनप्रसङ्गे पुरुषार्थचतुष्टयसम्पन्नाय गीताया महतीं भूमिकां प्रतिपादितवन्तः। ते चोक्तवन्तः कस्यापि शास्त्रेष्ठ शास्त्रत्वसम्पादनंष्ठ तदैव यदा तत्र पुरुषार्थचतुष्टयसम्पन्नाय सामर्थ्यं भवति। संगोष्ठ्या सभाध्यक्षा प्रोष्ठ मयूरी भाटिया आचार्या गुजरातयुनिवर्सिटी, स्वकीयाध्यक्षीयोद्बोधने विशिष्टवक्तृमुख्यवक्त्रोः व्याख्यानसारांशं मधुरगिरा निगदितवती।

सर्वादौ राजस्थानतः आचार्यविमलेशसुखवालेन वैदिकमङ्गलाचरणं प्रस्तुतम्। मध्यप्रदेशतः तृतीयकक्षाच्छात्रः आयुष्मान्प्रतीकशर्मा गीताश्लोकपाठं कृतवान्। संयोजकः डॉ. चन्द्रकान्तदत्तशुक्लवर्यः समेषामतिथीनां स्वागतं व्याजहार। गोष्ठ्याः सकुशलं सञ्चालनं गुजरातयुनिवर्सिटीतः डॉ. अतुल उनागरः सम्पादितवान्। धन्यवादविज्ञापनं संस्कृतविभागाध्यक्षा राजकीयमहिलामहाविद्यालयः डी. एल.डब्ल्यू.वाराणसीतः संयुक्तसंयोजिका प्रो.रचनाशर्मा सम्पादितवती। अन्ते शुभकामनासन्देशं पठितवान् डॉ. प्राङ्गेशकुमारमिश्रः। संगोष्ठ्यां नैके विद्वांसः, संयोजकाः, आयोजकाः, परामर्शकाः, शोधार्थिनः श्रोतारः समुपस्थिता आसन्। विशेषेण प्रो.कमलेशकुमारचौकसी, प्रो. शुभलक्ष्मीत्रिपाठी-प्राचार्या, प्रो.हेतलपण्ड्या, प्रो.उमाशंकरत्रिपाठी, प्रो.गीता श्रीवास्तवा, प्रो.मञ्जूलता शर्मा, डॉ. शैलेशतिवारी, डॉ. गीताशुक्ला, डॉ. सविता भारद्वाज, डॉ. मणिशंकरद्विवेदी, डॉ. मनीषशुक्लः, रविशंकरशर्मा, तेजप्रकाशः, रामप्रतापमिश्रः, परमहंसतिवारी, डॉ. आभाद्विवेदी, डॉ. सन्ध्या ठाकुर, अखिलेशकुमार, अनन्याश्रीवास्तवा, महकमौर्या, अखिलानन्द उपाध्यायः, प्रिया विश्वकर्मा, रोशनः, हृदयांशः, रविशंकरशर्मप्रभृतयो नैके जिज्ञासवः समुपस्थिताः आसन्।

वृत्तप्रेषकः डॉ. अम्बरीशमिश्रः सदस्यः गीतासङ्गोष्ठीसंयोजनसमितिः।

# निरंतर शिक्षणाभ्यासेन संस्कृतं सरलतम-माध्यमेन पाठयितुं शक्यम् - विनयश्रीवास्तवः



लखनऊ। उत्तर प्रदेश संस्कृत संस्थान, लखनऊ द्वारा 2023 तमस्य वर्षस्य अप्रैल मासे सञ्चालितायाः ओनलाइन संस्कृत भाषा शिक्षण कक्षायाः अन्तर्गतं विशिष्ट व्याख्यानम् आयोजितम्। यत्र प्रशिक्षु छात्राः भागं गृहीतवन्तः। प्रशिक्षून् संबोधयन्निदेशक विनय श्रीवास्तवः अकथयत् यत् शिक्षकः निरंतरं पाठनाभ्यासेन संस्कृतं अतीव सरलतम माध्यमेन पाठयितुमर्हति। नूतन शिक्षा नीतौ अपि सरल मानक संस्कृतम् उल्लिखितम्। प्रशिक्षण प्रमुखः सुधिष्ठ कुमार मिश्रः कथितवान् यत् सहजतां सुगमतां च अभिलक्ष्य संस्थान द्वारा निर्मित ई - पाठ्यक्रमः निर्मितः। शिक्षण सोपान गतं विशिष्ट चिन्तनमवधाय तत्तत्स्थलेषु एनीमेशन प्रयुक्तमस्ति । पाठयोजनाम् अभिलक्ष्य शिक्षकेण पूर्वसज्जाम् अवश्य करणीया तदैव सः सुगमं सहजं एवं च सरलं शिक्षणं कर्तुं प्रभवति। प्रशिक्षण समन्वयकः धीरजमैठाणी, राधाशर्मा, दिव्यरंजनश्च इत्येते शिक्षण गत अनुभवं वदन्तः आदर्श शिक्षणं प्रति प्रकाशं क्षिप्तवन्तः। उपस्थापनं, पदस्तरे वाक्यस्तरे च अभ्यासः, प्रयोगः च इत्यादि शिक्षण सोपानानि आधृत्य समग्र पाठयोजना सज्जीकृत्य शिक्षणमेव वस्तुतः भाषायाः संस्कारान् आदधाति। अस्मिन् अवसरे प्रशिक्षकः विनय शुक्ला , अनीता वर्मा, ओमदत्तद्विवेदी च आदर्श शिक्षणं प्रस्तूय प्रशिक्षूणां सोदाहरणं सविस्तरं , सविवरणं च शिक्षण सोपानानाम् अनुरूपं शिक्षणिकं मार्गदर्शनं कृतवन्तः। योजना सर्वेक्षकः चंद्रकलाशाक्या उपस्थित प्रशिक्षूणां उत्साहेन प्रशस्य व्याख्यानं सार्थकमिति प्रत्यपादयत्। कार्यक्रमस्य विषये प्रशासनिक अधिकारिणौ दिनेशमिश्रः , जगदानन्द झाः अपि परोक्ष रूपेण स्वविचारं प्रकट्य सत्रस्य सुचारूतया संचालन हेतु मार्गदर्शनम् अकुरुताम् । समन्वयन गणे धीरजमैठाणी कक्षा प्रशिक्षक प्रबंधनं विधाय समन्वयकौ दिव्यरंजनः आचार्या राधाशर्मा इत्यनयोः सहयोगेन समस्त कक्षाणां निरीक्षणम् अकरोत्। विशिष्ट सत्रस्य संचालनं स्तुतिगोस्वामी अकरोत। सवितामौर्यः सरस्वती वन्दनां, वैदिक मंगलाचरणं योगेश अवस्थी समागतेभ्यः धन्यवादं श्वेतावरणवालः संस्थान गीतिकागानम् अभिषेक पाण्डेयः अकुर्वन् । अवसरेस्मिन् समस्त प्रतिभागिनः, संस्थानस्य पदाधिकारिणः, प्रशिक्षकाः सामाजिकाः संस्कृतानुरागिणश्च उपस्थिताः।

# भारतीयज्ञानपरम्परायां पर्यावरणपरिरक्षणम्

-धनञ्जय सागर मिश्रः ( शिक्षाचार्य-छात्रः )
(शिक्षाशास्त्रविभागः)
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः,
केन्द्रीयविश्वविद्यालयः,नवदेहली,१६

परितः आवृणोति समस्तलोकान् इति पर्यावरणम्। प्रस्तुतोऽयं विषयः भारतीयज्ञानपरम्परायां पर्यावरणपरिरक्षणं नितरां हृद्यं वर्तते। अतः पर्यावरणपरिरक्षणविषये यदि लिलेखिषामः विवक्षामः तर्हि बहवो विचाराः अहमहं पूर्विकया मनसि प्रादुर्भवन्ति। तथापि विषयमिमं तावत् किञ्चित् स्फोटयामि।

अयं हि पर्यावरणपरिरक्षणस्य विषयः प्राचीनकालात् अद्यावधिं यावत् सर्वत्र व्याप्तो वर्तते। पर्यावरणपरिरक्षणस्य विषये पूर्वाचार्यैः बहुप्रकारकैः बहवः विषयाः बहुषु ग्रन्थेषु प्रतिपादिताः। धार्मिकग्रन्थेष्वपि अस्य महत्त्वपूर्णं स्थानं वरीवर्ति। सूर्यः, चन्द्रः, नदी, धरा, पर्वतः, पिप्पलवृक्षः, धेनुः, वृषभः इत्यादीनां समर्चनस्य वर्णनं भारतीयपर्यावरणसन्दर्भे भृशं प्राप्यते। भारतीयसंस्कृत्यां भौगोलिकं, खगोलीयं, इत्यनेन सह प्राकृतिकपर्यावरणस्य आध्यात्मिकपर्यावरणस्य च विषये ध्यानं दत्तमस्ति। पर्यावरणस्य अर्थः जीवनसंरक्षस्य कवचम् इति। पर्यावरणं तथा प्राणी परस्परम् आश्रितौ वर्तेते। अस्य पर्यावरणस्य इतिहासः तावान् प्राचीनः यावान् प्राचीनः मानवस्य इतिहासः वर्तते। किञ्च वर्तमानकाले अत्यन्तं दुष्करास्थितिः पर्यावरणप्रदूषणस्यैव वर्तते। अयं विषयः तावत् सविस्तरं निरूप्यते।

**प्राचीनभारतीयसन्दर्भे पर्यावरणम्**

इयं धरा अत्यन्तं प्राचीना विद्यते इति सर्वैः विदितमेवास्ति प्राचीनकालादेव ऋषीणां प्रकृतिसंरक्षणस्य तथा मानवस्वभावस्य विस्तृतं ज्ञानमासीत्। ते जानन्ति स्म यदयं मानवः स्वस्य स्वार्थाय नैकान् दोषान् करिष्यति। अतः तैः प्रकृत्या सह मानवस्य सम्बन्धः विरचितः भारते प्राचीनकालादेव प्रकृत्या सह चलनस्य परम्परा भृशं प्रसिद्धा वर्तते। भारतीयज्ञानपरम्परायाः धार्मिकग्रन्थेषु उपनिषत्सु प्रकृतेः पर्यावरणस्य च रक्षणाय महान्तो विचाराः प्राप्यन्ते।

तद्यथा- वृक्षाद् वर्षति पर्जन्यः पर्जन्यादन्नसम्भवः। वृक्षाणां कारणात् वृष्टिः जायते तया वृष्ट्या अन्नानि प्रादुर्भवन्ति। एवमेव ज्ञानपरम्परायामेव अन्यः विषयः संलक्ष्यते।

**दशकूपसमावापी दशवापीसमो ह्रदः।**
**दशह्रदसमो पुत्रः दशपुत्रसमो द्रुमः॥**

प्राचीनभारतीयज्ञानपरम्परायां पर्यावरणसन्दर्भे ऋषिभिः दशपुत्राणां रक्षणपालनसमम् एकस्य वृक्षस्य रोपणं संरक्षणं च परिकीर्तितम्। इत्येवं प्रकारेण अभिज्ञायते यत्प्राचीनाः पर्यावरणपरिरक्षणतत्पराः आसन्।

ऋग्वेदे अपि पर्यावरणरक्षणस्य तथा तस्य महत्त्वस्य विषये चर्चा समुपलभ्यते। मधु वता ऋतायते मधु क्षरन्ति सिन्धवः। इत्यस्मिन् मन्त्रे पर्यावरणसम्बन्धिसर्वेऽपि विषयाः मधुराः स्युः इति प्रकटितं वर्तते। वायुः मधुरः स्यात्। नदीमधुरा स्यात्। औषधिमधुरा स्यात्। रात्रिः मधुरा स्यात्। प्रभातं मधुरं स्यात्। आकाशः मधुरः स्यात्। वनस्पतयः मधुराः स्युः। सूर्यः मधुरः स्यात। गावः मधुराः स्युः। इति वर्णितं वर्तते। एवमेव अखिले वैदिकवाङ्गंमये पर्यावरणपरिरक्षणस्य बहवो विषयाः समुपलभ्यन्ते।

अश्वत्थमेकं पिचुन्दमेकं नयग्रोधमेकं दशचिञ्चिणीम्।
कपित्थबिल्वामलकं त्रयं च पञ्चाम्रवापी नरकं न गच्छेत्॥

पर्यावरणप्रदूषणनिवारणाय वृक्षारोपणस्य महती आवश्यकता विद्यते। भागवत्महापुराणे अयं विषयः प्रतिपादितः वर्तते यत् कश्चन अपि जनः एकम् अश्वत्थम्, एकं पिचुन्दम्, एकं न्यग्रोधं, दशचिचिञ्चिणीम्, त्रयं कपित्थबिल्वामलकं, पञ्चाम्रवृक्षान् आरोपयति चेत् स कदापि नरकं नैव याति। वैदिकऋषिः अपि वदति यत्- वनस्पतिं वन आस्थापयध्वम्।

इत्येवं प्रकारकाः पर्यावरणपरिरक्षणतत्पराः विषयाः अस्मदीयेषु ग्रन्थेषु सर्वत्रापि दरीदृश्यन्ते।

एवं हि- महाभारते अपि प्रतिपादितं वर्तते-
निर्वनो वध्यते व्याघ्रो निर्व्याघ्रः छिद्यते वनम्।
तस्माद् व्याघ्रो वनं रक्षेद् वनं व्याघ्रं च पालयेत्॥

वैदिककालं यदि परित्यज्य आधुनिकान् कवीन् पश्यामः तर्हि कविवरः कालिदासः अत्यन्तं प्रकृतिपर्यावरणस्नेही वर्तते। यतोहि तस्य विभिन्नेषु काव्येषु नाटकेषु च प्रकृतेः पर्यावरणस्य च अतितरां वर्णनं परिलक्ष्यते।

'आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः'
तद्यथा- कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।(मेघदूतम्)
पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रिय मण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥
(अभिज्ञानशाकुन्तलम्)

अस्मिन् नाटके कविवरः कालिदासः शकुन्तलायाः प्रकृतिप्रेम प्रादर्शयत्।

निष्कर्षः-स्वीकृतविषयः भारतीयज्ञानपरम्परायां पर्यावरणपरिरक्षणम् इत्यस्मिन् विषये वैदिककालादारभ्य आधुनिकं कालम् यावत् अमुं विषयम् अन्विष्य पापठ्य अयमेव सारः प्राप्यते यत् सर्वदैव सर्वस्मिन् काले च अस्य पर्यावरणस्य संरक्षणस्य विषये चर्चा कार्याणि च अभवन् नास्ति अत्र लेशमात्रोऽपि सन्देहः। वैदिककालादारभ्य महाभारतकालं यावत् ततः आधुनिकं कालं यावत् पठित्वा ज्ञात्वा च पर्यावरणपरिरक्षणविषये बहवः विषयाः विचाराः च प्राप्ताः तस्य विषये सविस्तरं उपरि उल्लेखः कृतः। एवमेव प्राचीनज्ञानपरम्परायां पर्यावरणपरिक्षणम् इमं स्वीकृतविषयम् अत्रैव उपसंहरामि।

# कालिदास अकादम्याम् अभिनंदनग्रंथस्य देवप्रवाहस्य विमोचनम्

कालिदास अकादम्याः संकुलमहाकक्षे सम्मान समारोहे सारस्वत अतिथिः रामानुज पीठाधीश्वर रंगनाथाचार्य महाराजः आसीत्। प्रमुख अतिथिः उच्च शिक्षा मंत्री डॉ. मोहन यादवः, प्रधान संपादकः शिव चौरसिया अभिनंदन ग्रंथस्य प्रकाशन पृष्ठ भूमिं प्रकाशितवान् । अवसरेस्मिन् संपादक मंडलस्य सदस्याः शिव चौरसिया, डॉ. हरीशकुमार सिंहः, डॉ. तुलसीदास परौहा,




महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालयस्य पूर्व कुलपतिः डॉ. मोहन गुप्तः, विक्रम विश्वविद्यालयस्य कुलपति -प अखिलेशकुमार पांडेयः समारोहे परमाचार्यः डॉ. देवकरण शर्मणः व्यक्तित्वं कृतित्वं प्रति प्रकाशितस्य अभिनंदन ग्रंथस्य देव प्रवाहकस्य अतिथयः विमोचनं कृतवन्तः।देव प्रवाहस्य डॉ. धर्मपाल शर्मा, परमानंद शर्मा अमनः, ईश्वर शर्मणः सम्मानम् उच्च शिक्षा आयुक्तः कर्मवीर शर्मा अकरोत् । परमाचार्यस्य जीवने आचार्य शैलेंद्र पाराशर द्वारा निर्मित वृत्त चित्रस्य प्रसारणं जातम्। सरस्वती वंदनां दीप्ति शर्मा प्रस्तुतवती । संचालनं ईश्वर शर्मा अकरोत् । आभारं धर्मपाल शर्मा ज्ञापितवान् ।

प्रथमपुटस्य शेषभागः **राष्ट्रविकासाय अर्थशक्तिः....**

कथितवान् यत् अवधानस्य क्रिया इय विधा वा दशकेभ्यः परं पुनः स्थापयितुं प्रयासः वर्तते । केन्द्रीय उच्च तिब्बती शिक्षा संस्थान-सारनाथस्य कुलपतिः प्रो गेसे नवांग समतेनः अवोचत् यत् विश्वविद्यालयस्य स्थापनायां तिब्बती संस्थानमपि समाहितम् । अष्टावधानविधा प्राचीन शास्त्रेषु निहिता ज्ञानराशिः । दुर्गावती विवि, जबलपुरस्य प्रो रहसबिहारी द्विवेदी अष्टावधानम् एक साहित्यिक चर्चेति प्रशस्तवान् । केन्द्रीय संस्कृत विवि, शृंगेरी, कर्नाटक परिसरस्य अष्टावधानी डॉ उमामहेश्वर एनट्टने उक्तवान् यत् अष्टावधानस्य विधायाम् एकः काव्यनिर्माता अष्ट प्रच्छुकाः भवन्ति। प्रो धर्मदत्त चतुवेर्दी, प्रो कमलाकान्त त्रिपाठी, डॉ ज्ञानेन्द्र सापकोटा, प्रो विजय कुमार पान्डेय, प्रो कमलेश झा, प्रो शिवराम शर्मा च स्वीयान् विचारान् व्यक्तीकृतवन्तः ।

अध्यक्षतां कुर्वन् विवि के कुलपतिः प्रो हरेराम त्रिपाठी उक्तवान् यत् देशस्य अतिविशिष्टाः प्रसिद्धाः अष्टावधानिनः डॉ उमाशंकर एन शृंगेरीद्वारा भारते विलुप्तां विधामिमां जागरितुम् एकां विशेष ज्ञान शाखां प्रदर्शयति।नूनमेव अनेके शिक्षकाः विद्यार्थिनश्च लाभान्विताः सन्तः एतया विधया परिचिताः भविष्यन्ति।

**पाठकानां कृते सूचना**


**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**



संस्कृतगज्जलिका शार्दूलवृत्ते

## तारोद्भवा वैखरी



प्रणेता©
**प्रो. ताराशंकरशर्मा पाण्डेयः**

कास्ते कान्तिसमुज्ज्वलातिललिता तारोद्भवा वैखरी।
ताराभूतिभवादिमुख्यकविता सा शांकरी वैखरी।।1।।
शब्दार्थोभयसिद्धभावविशदा संश्रूयते वैष्णवी।
कण्ठोद्भूतनिनादशब्दजनिता वाणी खरी वैखरी।।2।।
वार्तालापपरैः परस्पररतैः या कथ्यते श्रूयते।
या वाग्दुःखसुखोदये च समये सा सार्थकी वैखरी।।3।।
मूलाधारपरा समाधिनिरतैः सन्ध्यायते योगिभिः।
पश्यन्ती हृदि मध्यमा च मतिगा कण्ठोद्गता वैखरी।।4।।
वाणी या प्रियताङ्गता सुमनसोःसा मित्रयोर्माधुरी।
भाषायां कटुतानुभूतिभरिता कष्टप्रदा वैखरी।।5।।
कान्तावाचमथो सुकान्तवचनं श्रुत्वा मनो मोदते।
वार्त्तायां सुमुखीजनुर्मधुमुखी सानन्ददा वैखरी।।6।।
पुण्यश्लोककवेर्विलासरसिता नोधारसोद्भाविता।
साहित्याम्बुधिमाधुरी सहृदयैरास्वाद्यते वैखरी।।7।।
कादाचित्कतया कलावकलिता ताराकृपाकारणात्।
विद्याश्लेषविधानतः प्रसरते मे शांकरी वैखरी।।8।।

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित- प्रतिनवबाणभट्ट-पण्डित- श्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्ला-जीवैदिक-विश्वविद्यालय- कुलपतिना प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं 'तारोद्भवा वैखरी' नाम गजलगीतिकाव्यं सम्पूर्णम्।

---

## हनुमदष्टकम्

दशाननस्य काञ्चनेन निर्मितं पुरं हि यत्
ददाह लीलया सुसेवको रघूत्तमस्य तत्।
विदेहनन्दिनीकृपाष्टसिद्धिदायकं प्रभुं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम् ।।(1)
रघूत्तमः स राघवः हृदि स्थितो हि मारुतेः
ददर्श मानसं विदार्य कोशलेशराघवम्।
भयङ्करो निशाचराय जानकीकृते लघु
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(2)
करे च सौषधं गिरिं दधाति वायुनन्दनो
गदायुधः प्रयाति वानरोऽन्तरिक्षमण्डले।
नमन्ति नारदश्च शारदा वसुन्धराधरो
नमामि वायुपुत्रमौरसं शिवांशजं कपिम् ।।(3)
गुणाकरं महाकपिं भटं दिनेशभक्षकं
पिशाचभूतघातकं विपद्गतस्य रक्षकम्।
कचौश्च कुञ्चितैः सुशोभितं खमार्गगामिनं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम् ।।(4)
विभीषणस्य वानराधिपस्य चोपकारकं
निशाचरेशरावणस्य वाटिकाविनाशकम्।
महीधरस्य धारकञ्च लक्ष्मणस्य रक्षकं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(5)
यदा रसातलस्य रावणः प्रगृह्य सानुजं
प्रभुं कुलेश्वरीसमर्चनाय याति मन्दिरम्।
हतो वनौकसा तदा ससैन्यदानवश्च तं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(6)
हता च येन लङ्किनी तथाक्षयो रिपोःसुतः
प्रजापतेश्च गौरवे विधातृपाशबन्धनम्।
निकेतने दशाननस्य निर्भयो स्थितो हि तं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(7)
बलं न दुर्बलो जनो मनीषया हि वञ्चितो
धनं न निर्धनस्ततो न बान्धवाः न सुहृदः।
स एव रक्षकः स एव पालकस्ततो हि तंप
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(8)
छन्दः-पञ्चचामरम्

-मार्कण्डेयो रवीन्द्रः

## ।।भावोदयः।।



**-डॉ. निरंजन मिश्र**

ललितलवंगलताचयनाद्विरतेव हि मत्कविता चपला
कचकुचकेशगुणग्रथनादपि सास्ति विरागवती विमला।
शशिकिरणावलिदीप्ततमोभवनस्थमनोजधनो रणन-
श्रवणरसग्रहणादपि सा विमुखेव विभाति तपोनिरता।।
रतिपतिकार्मुकलक्ष्यतनोर्मनसो गुणगौरवगानरति
र्विशति न तद्धृदये सततं फलतीव विभाति सदा विरतिः।
नवनयदावविदग्धतरोरिह पल्लवसंगणनाद्विरता
गरलघटादमृतद्रवलुब्धनिषादकुलेऽपि न काऽपि रुचिः।।
जनमनसो विकलस्वरताललयाश्रयणे भजतीह सुखं
खलदलचन्द्रचकोरगुणग्रहणात्तु सदैव मनो विकलम्।
मधुकरपक्षविकर्तनकौशलमुग्धमना न हि मत्कविता
कविवरमौलिमणिद्रवपानविधानविधौ हि तदीयसुखम्।।
रसिकजनो+पि न मत्कविताननदर्शनमिच्छति चेद्धि वरं
कलुषितमानसपद्मवने+पि न जीवति हंसकुलस्य कलम्।
अभिमतलक्ष्यपथाद्विरता न कदापि भविष्यति मत्कविता
रसजलधेरमृतग्रहणाद्विरतेश्चरणे न कदापि सुखम्।।

---

रसिकवदनचुम्बवविरता कविता कविता न कदापि सखे
नित्यं नवलभुजंगवती वनिता वनिता न कदापि सखे।
मधुकरमानसवारितापिनी लतिका लतिका नैव सखे
तमसश्चरणविचुम्बनलीनस्सविता सविता नैव सखे।।
काले प्रणमति दशति च काले नैव मित्रता साऽस्ति सखे
दृष्ट्वा+न्यायमपीह धीरता नैव धीरता क्वापि सखे।
मलयजघातदलितपथिकानां कारता ज्ञेया न सखे
सहचरशूलहतानां दैन्यं गणनीयं न कदापि सखे।।
नलिनीवदनविमर्दनसक्ता भवति बीरता नैव सखे।
गर्दभगौरवगीतलेखने विद्वत्ता न कदापि सखे।
निजकर्तन्या पादतकर्तनं विज्ञानं न कदापि सखे
जनजनभेदनकर्मसाक्षिणी विश्वबन्धुता नैव सखे।।
कलिकारसपानाद्विरता भवतीह मधुपता नैव सखे
मधुपं विना कनककलिकापि भाग्यवती न कदापि सखे।
पल्लववसनविहीना लतिका रमणीया न कदापि सखे
पतिमुखमण्डनविरता विपिने वासन्ती न कदापि सखे।।

---

## ।। मधुमयगरलम् ।।

मधुमधुरा स्मितिरेव यदा गरलं वमतीह विनाशकरं
मधुकरगुञ्जनमेव यदा श्रवणं विभिनत्ति विनैव शरम्।
द्विरसनवंशविभूषणचुम्बननिन्दनमस्तु कथं सुजनैः
खलजनवाक् शरविद्धमनो भवतीह कथं सततं विकलम्।।
सहचरता हि यदा गरलेन निषिञ्चति मानसपुष्पवनं
रिपुदलकार्मुकरज्जुविभेदनमूलकशिक्षणमेव कथम्।
हृदयविदारणकौशलमेव यदानुजमानससत्कमलं
ह्यसमयवज्रनिपातनभीतिवशादिह कम्पनमेव कथम्।।
शिखरिशिरोमणिगह्वरसेवनमस्तु भवार्द्धतनोः कृपया
मणिमयहर्म्यनिवाससुखं न कदापि भवेत्खलमित्रतया।
स्वजननिगूढशरावलिघातनतो रुचिरं रिपुशस्त्रबलं
मधुरमुखोद्गतदावशिखाज्वलनाद्रुचिरं यमराजमुखम्।।
विषधरमानवदन्तगतोल्वणमत्र हरिष्यति को भगवन्
जनगणवञ्चनकौशलमर्दनमत्र करिष्यति को भगवन्।
मृदुवचनावरणे खलतास्ति यदा मखभूतिविभूतिवती
हृदयतलस्थितकण्टकशोधनमत्र करिष्यति को भगवन्।।

## कलियुग !!!



**-डॉ. अरविन्दकुमारतिवारी**

खलविषधरगणचरणसरणगृह! कुजनकथनसुखसदनविलसन!
अमरतनयबुधसुजनवचनहत! वरुणगरुडसम! विधिकृततरुण!
जनयसि दनुजमनसि विषमरिवर!
शुभगुणहर! जनमतिगतिहरण!
कलियुग! कथय कुपथरथचितरण!
कुरु हरिभजनमगुणगणगणन!१
स्वजनविमुखजनशरण! सकलमलमलिन! विमलजलमकर! कुमलभर!
नृपतिकनकमणिमुकुटविहितगृह! भवलयकर! दितिसुतसुखसदन!
गणपतिकपिपतिकविपतिकृतभयशमितनिखिलबल! कलुषितवदन!
कटुककवनविरचितमिदमभिनव-सरसकथनमभिचर कलियुग वर!!२
त्रिभुवनभवनविचरणचतुर इव चरसि सपदि रचयसि किमरचन!
हरिपदकमलमचिरभिलषसि न गमयसि खलजनवसतिमनुपम!
सुतपितृकलहकरण! मुनिधृतिहर! विपदहिकुलमुपनयसि मनुजखर!
श्रय रघुवरगुणविपिनमटनभट! जितरविशशिबल! कलियुग! गुणहर!३
अहिनृपविषगल! कवलितगुणिगुण! विदलितबुधकुल! खलकुलगमन!
विकटसमरभर! सृतकविपदहर! गहनसघनवनसदनदहनकर!
भ्रमसि सबलमगणितशरवरधर! जगदभिनववनविटपमनुजहर!
मनसि विहर न विदय! नयमनुसर!
गिरिशपिहितकलनयनमनुचर!! ४
विहतविततभव! मुनिमखखर! इव शठहठमठ! शिवशरणविमुखसख!
बुधगुरुवरणविनयपटुवटुमट जगदतुलितनट! कुजनचरणसुख!
अमृतमधुररसभरितविबुधनिधिमगुणजलधिमधिहरणनिरतपद!
कलियुग! कुरु कलिमलमलमतुलित! हिमगिरिविमलसलिलमिह वहति.

## अयि जननि!!

सुतकविमधुरविलपनमुदितमतिरवसि सपदि भुवि गुणिजनजननि!
निजकरकमलनयनजलकणमयि हरसि सुमधुवनसुमशतधनिनि!
नवपदसरसि सरसि नहि कथमिव कलिजमनुजखलदलबलदलनि!
शिशुकविविपिनकुसुमकुलशतदल हृदयभवनमधिकुरु भवशमनि!१
अबुधविबुधबुधसुजनकुजनजनमनसि वससि परमयिमृतिलवनि
भवभयवनहरिवचनदहनमिह गणयसि किमु वद कविगृहनटिनि!
अटति वियदि खग इव कविकुलमिति रचयति सरसिजमिह कृतिकरिणि!
यदि न हरसि मदजलधिमचिरमयि तनयमिममव नवपदनलिनि२
अनुदिनमिदमिह जननमरणपलमतति मनसि मम भवगतिहरिणि!
कवलितकविकुलकलमव मुनिजनविगलितवचनकुसुमवनरमणि
अजहरिहरमुखजनितमधुररवमुदितमनुजमखफलरसभरणि!
यदि न वदसि मृदु रहसि कवनधनमिममयि वद खलगणकृतिदमनि!! ३
कृतकृतिविधिकटुमधुफलरससुखममरभवनसुखमिव कविनयनि
अभिरचयसि कविमनसि ललितपदविविधकवनमयि गृहिमददहनि!
अरसरचनमिह सरसमचिरमयि!नवरसकलशसलिलरसझरिणि!
तव पदकमलयुगलकृतवसतिरयत इव गुणिगणमव वटुजननि ४
इदमेव पदसुममयि तव पदयुगमतिविदलितयतिरतिततिरचनि!
समुपहरति कविकुलशशिधवलितविमलवियति कलकमलकमलिनि!
गमयसि शचिपतिपदमिति जनमिममयि रसमयि नय नरलोकतरणि!
मयि न विहरसि कुपित इति निगदति कवयति कलिकलकविकुलरमणि! ५

## शास्त्रसपर्या

**-डॉ. प्रियव्रतमिश्रः**
**सहाचार्यो विभागाध्यक्षश्च व्याकरणविभागे**
**श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी**

वाचोयुक्तिविभक्तिविग्रहचयं व्युत्पत्तिवैशेषिकं व्यस्तं तच्च नमस्तवाक्यनिखिलं तितद्धिताद्यव्ययम् ।
धातुं प्रत्ययजालमाल्यमखिलं सम्बन्धिकां संहितां शब्दानां हृदयं यदीच्छसि सखे! भाष्यान्तकं सेव्यताम् ।।१।।
उत्प्रेक्षायमकादिकाव्यवसनं श्रृङ्गारहारोज्वलं गद्यं पचनुधान्वितश्च निखिलं तनाटकं शोभते ।
दैवी लोकपरा च कल्पितकथा संवादसन्देशकं पीयूषं नवनीतमेव च सत्रे ! काव्यालयै विद्यते ।।२।।
वेदचाँ नियतार्थसाधकमिदं धर्मार्थशाखं परं प्रामाण्यं निजतश्चतुर्विधविधिर्यागादिकर्माखिलम् ।
आख्यातार्थविशेष्यकं निगमनं मुख्यार्थिका भावना मीमांसाशरणं प्रयाहि च सखे! वेत्तुं नयं तत्त्वतः ।।३।
सत्यं ब्रह्म जगत्तथैव वितथं मायामयं सारतस्तत्त्वं त्वञ्च न विद्यते परमिदं तथ्यं विजानीहि भोः !
प्रस्थानेषु च सम्यगपनिषदं जीवात्मतत्त्वं परं विज्ञातुं यदि वाञ्छसीह न सखे! वेदान्तविद्यां भज ।।४।।
तर्फेणैव पदार्थसाधनमतिः संसर्गात्राविनो लक्ष्यं विलेन पक्षसहितं संसाध्यते तत्त्वतः ।
हेत्वाभासविभागजात्यत्रयचं दृष्टान्तसिद्धान्तकं ज्ञातुं तत्सकलं पदार्धनिचयं न्यायाख्यशास्त्रं पठ ।।५।
चौतन्यं जहतत्त्वयोगसहितं सृष्टी साकारणं सत्कार्यास्यमतञ्च तत्त्वनिखिलं शास्त्रे भृशं चर्चितम्।
गंगारस्त्रिगुणात्मकः पुनरहो बन्धादिमोक्षान्वितरतत्त्वं तत्सकलञ्च वेदितुमिदं सांख्यायनं संधय ।।६।।
ब्रह्माण्डग्रहगोचरादिविषयं नक्षत्रराशिस्थिति लग्नानाश्च शुभाशुभादिविषयं शास्तीति शाखं ततः ।
त्रिस्कन्धान्वितशास्त्रकालपरकं लोकातिरिक्तं न वा तस्माज्ज्योतिषनामक नयममुं श्रद्धायुती धारय ।।७।।
ध्यायं ध्यायमनन्तकल्पनिचयं विज्ञाय तत्त्वं ततः पाय पायमशेषमाज्यममृतं सन्तुष्यतान्मानसम् ।
वेदं वेदंमहेयवाक्यमखिलं युक्त्या व सिद्धान्ततः शास्त्राणां निहितार्थसारसकलं विन्दस्व हे बुद्धिमन् ! ।।८।।

# गोपांगनावैभवमहाकाव्यस्य समीक्षा



-डॉ.अरविन्दकुमारतिवारी

गोपांगनावैभवमिति महाकाव्यम् आचार्यप्रवरेण प्रमोदशर्मणा विरचितमद्भुतमभिनवं काव्यमस्ति। अस्मिन् द्वादश सर्गा विलसन्ति, प्रायो नारीणां नायकत्वमाश्रित्य न बहूनि महाकाव्यानि रचितानि काव्यकारैरिति विभावयामो वयं संस्कृतकाव्यपथिकाः। किन्तु वृन्दावनामृतपानपीवरो धीवरः कविवरो राधामुकुन्दस्तवनश्रवणपूतकर्णकुहरः प्रभुपादभक्तिरसभावितो निर्ब्याजं सुखमनुभवन् प्रणीतवानिदं सरसं मधुरं काव्यम्।

आद्ये सर्गे मंगलपद्यानि विलसन्ति, तेषु नूनमेव प्राचीनकवीनामस्ति प्रभावः। किन्तु अयं प्रभावः तान् कवीन् स्मारयति यैः श्रीराधा काव्येषु संस्मृता लीलाधरो भगवान् श्रीकृष्णो बहुधा स्तोत्रध्वनिना स्मृतश्चेति। प्रथमसर्गस्य एकमुदाहरामि मंगलपद्यम्। यथा

**गोपांगनेश! रसिकेश्वर! गोपकृष्ण! गोपांगनासु रमणाय रसप्रियासु।**
**हे श्यामलांग! भगवन्! हृदयान्मदीयान् नैव प्रयाहि शृणु नम्रनिवेदनम्मे॥ ३**

अस्मिन्नेव सर्गे राधिकां संस्तुवन् कविवरो ब्रूते-

**हे राधिके! तव सखा नवनीतचौरः चौर्यं करोति मनसामपि सर्वपुंसाम्।**
**संचोरितम्मम मनोऽपि वद प्रकामं विज्ञापयाव चल तां जननीं यशोदाम्॥ १७**

महाकाव्यस्य रूपमादधानमिदं काव्यं रुचिरमाभाति। प्रथमसर्गे चतुष्षष्टिः पद्यानि सन्ति।

अत्र अन्तिमं पद्यं मन्द्रक्रान्तावृत्ते शेषपद्यानि तु वसन्ततिलकाच्छन्दसि विलसन्ति।

अहो! द्वितीयसर्गे मन्दाक्रान्ताप्रयोगो व्यधायि कविनेति दृश्यते। अस्य सर्गस्य आरम्भो गोकुलवैभवेन भवति। यत्र गोपिकाः, भ्रमराः, पुष्पाणि चेति सर्वमपि मनोहरं दृश्यं प्रकटीभवति। आगत उद्धवः पर्णशालानिकुंजे राधां पश्यति। एतत्पद्यमिदमाकर्ण्यताम्।-

**कुंजस्यान्तर्मृदुसुललिते पर्णशालानिकुंजे राधासख्यो रुचिरमनसा कृष्णसौन्दर्यचित्ताः।**
**वार्तालापे गिरिधरवरं संस्मरन्त्यश्च काश्चिल् लग्नाः काश्चिद्ध्यविरसतया कृष्णचन्द्रस्य भक्तौ॥ ४**

अस्य सर्गस्य अन्तिमं पद्यमुपेन्द्रवज्रावृत्ते वर्तते। षट्पंचाशता पद्यैरयं सर्गो दर्शनीयो वर्तते।

प्रसादगुणगुम्फितानि इमानि पद्यानि पाठकानां चेतांसि विद्युद्गत्यैवाहरन्तीति निस्संशयं वक्तुं शक्यते।

तृतीयसर्गे गोपिकानां दशा विलोकनीया वर्तते। तत्रत्यं पद्यमेवास्तु प्रमाणम्। यथा यथा नदीनां जलजादिकानां जलं विना जीवनमेव नास्ति।

**हरेर्मुरारेर्व्रजकन्यकानानां तथोद्धव! प्रेमजलं विना नः।। 3**

अत्र गोपीनां संवादः विलक्षणो वर्तते। सामान्यशैल्या कविना लोकालावण्यमयं कथानकमत्र ग्रथितमस्ति। यथा श्रूयते गोपिका उद्धवः अवदत्, यद् यूयं योगमार्गेण स कृष्णो ध्यातव्यः। अत्र हिन्दीभाषायाः प्रथितकवीनामपि यत्र तत्र प्रभावः परिलक्षितो भवति। अनेन काव्यमण्डनमेव मन्यते। वैयाकरणवर्येण कविना शर्मणा सश्रद्धं प्रचलितपदैरपि निजपद्यपदसर्जनं कृतमस्तीति। इयं परम्परापि सत्कवीनां स्मरणं कारयति। यथा अस्यैव सर्गस्य अन्तिमं पद्यम्।

**गोपालबालान्नवपीतवस्त्राद् वंशीधराद्वा कमनीयकान्तात्।**
**कृघ्ष्णात्परं ब्रह्म वयं न किंचिज्जानीमहे ह्युद्धव! निर्गुणन्तत्॥ ५४**

चतुर्थसर्गे गोपिकानां संवादेन निरुत्तर उद्धवस्ताभिर्बोध्यते। यथा

**श्रीकृष्णदूतं मुखकान्तिहीनं प्रोचुस्तदानीं व्रजवल्लभास्ताः।**
**का तेऽस्ति चित्ते महती समस्या किं जातमस्ति स्मर राधिकेशम्॥ १३**

पंचमसर्गस्य आरम्भे कविरयं महाकविं कालिदासं स्मारयति पद्यरचननैपुण्येन। यथा

**अस्त्युत्तरस्यां दिशि भारतात्मा व्रजप्रदेशो भुवि राजमानः।**
**अस्यैव कालिन्दजलं स्पृशन्ती सुराजधानी मथुराभिधेयम!॥ १**

अत्र पद्यप्रवाहो गंगासलिलप्रवाह इव सुखदो वर्तते।

षष्ठे सर्गे राधास्मरणं बहु शोभनं विलोक्यते। तद्यथा

**वृषभानुसुतां राधां हृद्यां वृन्दावनेश्वरीम्।**
**दर्शं दर्शं हृदि श्यामो मुमुदे देवकीसुतः॥ ९**

अत्र हृद्यां हृदि इति पदन्यासेन अनुप्रासो मनोहरो जातो वर्तते।

सप्तमे सर्गे श्रीकृष्णोद्धवसंवादो विलोकनीयोऽस्ति। अत्र भगवता चतुर्विधं भक्तस्वरूपं प्रोक्तमस्ति। यत्र भक्तिरसप्रवाहो मधुरो दृश्यते। अस्मिन् सर्गे श्रीमद्भगवद्गीताया

द्वादशसर्गस्य प्रचुरः प्रभाव वर्तत इति वक्तुं शक्यते।

नवमे सर्गे कविना स्रग्विणीवृत्ते मनोहरं चित्रणपुपस्थापितमस्ति श्रीराधिकायाः। यथा

**धाम्नि वृन्दावने शोभिता राधिका कृष्णचन्द्रस्य नारायणस्य प्रिया।**
**श्रद्धया भक्तिभावेन सम्मानिता नारदेनात्मनाराधिता च स्तुता॥ १०**

दशमाध्याये तु कविना डॉ.प्रमोदशर्मणा यादृशी गोपीगीतिका प्रस्तुता सा सर्वथा श्रीमद्भागवतस्थगोपीगीतिमपि जयति। अहो कवे! शब्दनैपुण्यम्! सर्वाण्यपि पद्यानि मनोहराणि प्रतिभान्ति। एकमुदाहरणमास्वाद्यताम्। यथा-

**कदा संयोगस्ते कमलननयन! प्रीतिजनको**
**विना संकोचेन स्मितवदनधारिन्! प्रभविता।**
**वियोगं हित्वास्मानधरसुधया तर्पय सखे!**
**प्रतीक्षायां सर्वा वयमिह रतास्स्मः प्रतिपलम्॥ ९**

एकादशसंख्यकः सर्गः शार्दूलविक्रीडितच्छन्दसि विरचितो वर्तते। सर्वत्र भाषा विशुद्धा भावमयी सरसा ललिता वर्तत इति पश्यन्नहं मोदमनुभवामि।

आदिमे पद्ये भगवान् श्रान्तानां गोपीनां स्वेदबिन्दूनपाकुर्वन्

स्तुतः कविना। यथा

**वृन्दारण्यधरास्थरम्ययमुनातीरे महानन्ददे**
**श्रीकृष्णेन सहैव सुन्दरमहारासे विहारात्तदा।**
**श्रान्तानां वदनानि कोमलतमान्यानीय हस्तेष्वहो**
**गोपीनामतिसुन्दराणि भगवान् प्रमार्ट्करेण स्वयम्॥ १**

अयमपि सर्गः एकपंचाशता पद्यैर्ग्रथितो वर्तते। सर्वत्र हस्तामलकवद् अर्थाः पाठकानकार्षन्तीति विभावयामि।

अहो कौशलं कवेः! अन्तिमः सर्गः स्रग्धराच्छन्दसि विरचितो मनो मोहयतीवेति। सर्वाण्यपि मनोहराणि पद्यानि पाठकैरवश्यं पठनीयानि। केवलमहमेकमत्रोदाहरामि पद्यम्। यथा

**स्मारं स्मारं चरित्रं नटवरवपुषः कृष्णचन्द्रस्य दिव्यं**
**नन्दः प्रोवाच दूतं सुमधुरवचसा नीलकंजाभदेहम्।**
**कृष्णोऽस्माकं मुकुन्दः प्रियवचनकरो बाललीलाभिलाषी**
**नायास्यत्यत्र कर्तुं व्रजभुवि रमणं किं सखीभिस्सहैव॥ ४**

अस्मिन् सर्गे एकपंचाशत् पद्यानि कविवरस्य काव्यकलानैपुण्यं दर्शयन्ति। अनेन प्रकारेण मया राधामुकुन्दचरणचतुष्टयं मुहुर्मुहुः वन्द्यते। भगवद्भक्तिरससंवलितमिदं महाकाव्यं लोकाय मंगलकारकं भूयादिति आशंसे। किमहमधिकं वदेयम्, महीयं कविवृन्दविपिनमयी अवश्यमेव अस्य सुकवेर्भवतः आचार्यवरस्य प्रमोदशर्मणः काव्यमिदं दर्शं दर्शं यशोगानं विधास्यति भवदीयमिति ममान्तकःरणप्रमाणम्।

**गौपांगनावैभवनामकं यत् हृद्यं मनोहारि विलोकितं तत्**
**नव्यं महाकाव्यमहो मयेदं श्रीमत्प्रमोदस्य कृतं मनोज्ञम्॥**
**राधास्तुता शक्तिरसौ धरायाः राधाधरः संस्तुत एव कृष्ष्णः।**
**उभावपि प्रार्थितदेवदेवौ करिष्यतः सत्कविमंगलानि॥**

एतादेव यथाबुद्धि वाचिकं शुभाशंसनं प्रदाय भवते गुरवे महाकाव्यकाराय नम इत्युक्त्वा भगवन्तं विश्वनाथं मातरमन्नपूर्णां च स्तौमि यदिदं महाकाव्यं भूयान्नारीचेतनासमुद्भावकमिति।

परिकल्पकः अमरवाणीकविपरिषदः
सम्पादकः काव्यामृतवर्षिणीपत्रिका, साहित्य-अकादमीबालसाहित्यपुरस्कारपुरस्कृतः
बाणभट्टपुरस्कारपुरस्कृतः






# उज्जयिनीस्थपाणिनिसंस्कृत विश्वविद्यालये प्रति-बुधवासरं हरितक्षेत्रमित्युद्घोषितम्

वार्ताहरः डॉ. दिनेशः चौबे

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालये पर्यावरणस्य संरक्षणाय प्रति-बुधवासरं हरितक्षेत्रम्(Green zone) इति घोषितम् अस्ति । अस्मिन् दिने परिसरे वाह्नानां प्रवेशः वर्जितः वर्तते।



गतवर्षादारभ्य अयं नियमः प्रवर्तते। विश्वविद्यालयस्य मान्यकुलपतिः आचार्यविजयकुमारसीजीवर्यः उक्तवान यत्-'अनेन पर्यावरणस्य संरक्षणं भविष्यति। वयं वायुजलमृद्भिरावृत्तेः वातावरणे निवसामः। एतदेव पर्यावरणं कथ्यते। पर्यावरणेनैव जीवनोपयोगिवस्तुनि प्राप्नुमः। जलं वायुश्च जीवने महत्त्वपूर्णो स्तः। साम्प्रतं प्रदूषणसमस्या वर्तते। अनेन विविधाः रोगाः जायन्ते। पर्यावरणस्य संरक्षणमत्यावश्यकम्। तदर्थं वृक्षाः आरोपणीयाः। वयं नदीषु तडागेषु च दूषितं जलं न पतेम। तैलरहितवाहनानां प्रयोगः करणीयः। जनाः तरुणां रोपणमभिरक्षणञ्च कुर्युः' इति संदेशः तेन समाजे जागृतिमानेतुम् दत्तः । एभिः कार्यैः अन्यजनाः अपि प्रेरिताः भवन्तीति। सप्ताहे एकवारम् आवश्यकरूपेण वाह्नानाम् उपयोगः मास्तु द्विचक्रिकया आहोस्वित् पादाभ्याम् अवश्यं चलनीयम् अनेन तैलस्य रक्षणं स्वास्थ्यलाभो च जायते।

# 'बालभारती-पब्लिक-विद्यालये समायोजितम् अन्ताराष्ट्रियशैक्षिकमेलकम्'

-डॉ.युवराजभट्टराई

नवदिल्ली। सरगंगारामचिकित्सालय-मार्गस्थिते बालभारतीपब्लिकस्कूल इत्याख्ये प्रशासनेतर-विद्यालये ऐषमः अप्रैल पञ्चदश्यां शनिवासरे बहुदेशीयेषु अन्ताराष्ट्रियेषु विश्वविद्यालयीयेषु शिक्षाक्षेत्रे छात्राणां जीवन-निर्माणार्थं मल्टी कंट्री यूनिवर्सिटी 'एजुकेशन फेयर' इति अन्ताराष्ट्रियशैक्षिकमेलकम् बृहद्रीत्या आयोजितम्। एषः कार्यक्रमः प्रधानाचार्यस्य श्री एल.वी. सहगलस्य मार्गदर्शने नेतृत्वे च विशेषरूपेण






उच्च-माध्यमिक-विद्यालयस्य छात्रेभ्यः समनुष्ठितः आसीत्, येन इमे छात्राः विविधैः अन्ताराष्ट्रिय-विश्वविद्यालयीयैः प्रतिनिधिभिः साकं परिचर्चापूर्वकं निज-शैक्षिकजीवनोन्नयनाय के के शैक्षिक विकल्पाः विदेशेषु उपलब्धाः वर्त्तन्ते इति विषये अपि ज्ञातुम् प्राप्नुयुः। अस्य एजुकेशन फेयर इति अन्ताराष्ट्रियशैक्षिकमेलक-कार्यक्रमस्य प्रथमं सत्रं प्रातः 10:00 वादनतः 11:00 वादनपर्यन्तं टोरंटो विश्वविद्यालयस्य प्रतिनिधिभिः सह परिसंवाद-सत्रत्वेन समायोजितम्। यस्मिन् वैदेशिक-विश्वविद्यालयेषु प्रवेशप्रक्रियाविशेषज्ञः तत् तत् परामर्शदाता च 'अप्रतिमः मुखोपाध्यायः' छात्रान् सम्बोधितवान् वैदेशिकेषु विश्वविद्यालयेषु भारतीय छात्रेभ्यः जीवनोन्नयनप्रसङ्गे उपलब्ध-शैक्षिकावसराणां सन्दर्भे प्रवेश प्रक्रियाविषये च छात्रान् अवगतीकारितवान्। चर्चासत्रस्य अवसरे छात्रजनैः निज-जिज्ञासाः प्रश्नाश्चापि तस्य पुरतः उपस्थाप्य तेषां समाधानम् अधिगतम्। अपरत्र च अस्य एजुकेशन फेयर मेलकस्य द्वितीयसत्रं IELTS (आई.ई.एल.टी.एस.) इत्येतस्मिन् आधारिता आसीत। यद्धि पूर्वाह्णे 11:00 वादन-तः मध्याह्ने 12:00 वादन पर्यन्तम् आयोजितम् अभूत्। एतदन्तर्गतं IELTS इत्याख्या परीक्षा अर्थात् अन्ताराष्ट्रियाङ्गलभाषा-परीक्षण-व्यवस्था-विषये विस्तारेण छात्राः प्रबोधिताः। ध्येयमस्ति यत् विदेशेषु , यत्र आङ्गलभाषा एव सम्प्रेषणस्य मुख्या भाषा वर्तते यदि छात्राः तत्र गत्वा पठितुं कार्यं कर्तुं च वाञ्छति चेत्तस्य कृते एषा परीक्षा अनिवार्य-रूपेण देया भवति। येषां देशानां विश्वविद्यालयेषु प्रवेशार्थं आई.ई.एल.टी.एस. इति परीक्षा स्वीकृता भवति, तेषु ब्रिटेन-ऑस्ट्रेलिया-न्यूजीलैंड-अमेरिका-कनाडा-प्रभृतयः सन्ति प्रमुखाः। एतस्मिन् सत्रे छात्राः सम्बोधिताः यत् अस्याः परीक्षायाः अवसरे अभ्यर्थिनः आङ्गलभाषाध्ययनस्य, भाषणस्य, लेखनस्य च कुशलता परीक्ष्यते। एषा परीक्षा कथं सरलतया पारयितुं शक्या इति विषये अपि छात्राः विस्तारपूर्वकं संसूचिताः। साकमेव वैदेशिक-शिक्षायाः कृते शिक्षा ऋणम् कथं कुतः च प्राप्तुं शक्यते इत्येतद्विषयैपि छात्राणां मार्गदर्शनं विहितम् । अस्याः एजुकेशन फेयर चर्चायाः अन्तर्गतं पञ्च चत्वारिंशदधिकानां विश्वविद्यालयानां प्रवेश-प्रतिनिधिभिः सह युगपदेव एकत्र सम्मुखीभवनम् अपि छात्राणां कृते महान् अवसरः सिद्धः छात्रैः निजप्रश्नानां समाधानमपि प्राप्तम्। कार्यक्रमे छात्राणाम् उत्साहः दर्शनीयः आसीत्।

# जयपुरस्थ सञ्जय-शिक्षक-प्रशिक्षण-महाविद्यालये पञ्चदशदिवसीय-संस्कृतसम्भाषण-शिविरस्य आयोजनम्

**-दीनदयालशुक्लः**

संस्कृतप्रचार-प्रसारस्य कार्यक्रमः सम्पूर्णदेशे च विदेशे अपि सम्प्रतिसंस्कृतज्ञैः सञ्चाल्यते । जयपुरस्थ शिक्षकप्रशिणमहाविद्यालयस्य शिक्षाशास्त्रिविभागे अपि आधुनिक-विश्वस्य उद्देश्यस्य अनुरूपमेव आधुनिक-दृशा छात्राणां ज्ञानाभिवृद्धये, संस्कृतस्य अध्ययनम्प्रति तेषाम् अभिप्रेरणाय च विविधाः उपायाः प्रकल्पिताः सन्ति। तस्मिन्नेवोपक्रमे सञ्जय-शिक्षक-प्रशिक्षण-महाविद्यालयः इत्याख्ये विद्यालये





पञ्चदशदिवसीयस्य संस्कृतसम्भाषणशिविरस्य आयोजनं कृतमासीत्। प्रचलितस्य सम्भाषणशिविरस्य भव्यसमापनकार्यक्रमः शुक्रवासरे मध्याह्ने सञ्जयशिक्षकप्रशिक्षणमहाविद्यालयस्य सङ्गोष्ठीप्रकोष्ठे सञ्जातम्। यस्मिन् समापनसत्रे महाविद्यालयस्य आदरणीया प्राचार्यामहोदया डॉ0 सुनीताभार्गवः मुख्यातिथित्वेन समुपस्थिता आसीत। स्वीयोद्बोधने तया उक्तं यत् अधुना देशे विदेशे च जनानां कृते संस्कृतमाध्यमेन वार्तालापं कर्तुं बहव्यः संस्थाः सरलसम्भाषणं कारयन्तति। दशदिवसीयशिविरबिन्दुमाध्यमेन संस्कृतसम्भाषणे देशे लक्षाधिकजनाः सन्ति। अत्र अपि संस्कृतप्रशिक्षकः संस्कृतभारत्याः पद्धत्यानुसारेण जनेषु संस्कृतमवतर्तुं सम्भाषणशिविरं सञ्चालयति। विद्यालस्य प्रधानाचार्य-महोदया छत्रेभ्यः संस्कृतस्य महत्वं विषये अपि उद्बोधितवती। कार्यक्रमे महाविद्यालयस्य प्राध्यापकः डॉ0 महेशकुमारपारिकमहाशयानां मार्गदर्शनं सर्वैः अपि प्राप्तम्। विंशत्युत्तर-द्वि-सहस्र-तम-वर्षस्य नूतन-शिक्षानीतेः आधारेण संस्कृते किन्नु विद्यते इति विषये नैजं वैदुष्यपूर्णम् वक्तव्यं प्रदाय छात्रान् अभिप्रेरितवान् । अमुस्मिन्नवसरे डॉ0 रीटा झांझरियामहाशया तथा महाविद्यालयस्य वरिष्ठः आचार्यः शिक्षाचार्यविभागाध्यक्षः डॉ0 रतनकुमारभारद्वाजवर्याः विशिष्टातिथित्वेन कार्यक्रमस्य शोभां वर्धितवान्। तेन कथितं यत् संस्कृतवाङ्मये निहिताः ज्ञान-विज्ञान-अध्यात्म- नाट्य-संगीत-नृत्-योग-आयुर्वेद-चित्रकला-मूर्तिकला प्रभृतिभिः भूरि विषयैः साकं दैनिकजीवनेन सह संस्कृतस्य दृढीयान् सम्बन्धो वर्तते।

समापनसत्रे प्रशिक्षकेन कथितं यत् अस्माकं प्राचीन-विद्वत्-प्रवरैः ऋषि-मुनिभिः विरचितस्य विपुल-वाङ्मयस्य संरक्षणाय चापि विचार-विमर्श-पूर्वकं विचर्च्य एषः कार्यक्रमः जयपुरस्थ-प्रशासनेतर-विद्यालयेषु संस्कृत-भाषायाः संवर्धनार्थम् विभिन्न माध्यमेन बलवत्तरं सहयोगं प्रदाय समेषां मार्ग-प्रशस्ती-करणम् अपि भविष्यति। संस्कृत भाषा प्रणीतानां वेद, वेदाङ्ग, उपनिषद्, ब्राह्मण, आरण्यक, धर्मशास्त्र, पुराण, इतिहास, दर्शन, योग, आयुर्वेद, शिल्प, वास्तुशास्त्र, अर्थशास्त्र, खगोल, भूगोल चेत्यादि-विषयाः चापि तत्र प्रदर्शिताः सन्ति। अग्रेऽपि एतादशानि शिवराणि भविष्यन्ति।

अस्मिन् कार्यक्रमे डॉ0 श्वेताभार्गवः, डॉ0 यशवन्तीमहोदया, डॉ0 ज्योतिः, डॉ0 अञ्जना अग्रवालसहितं विद्यालयस्य सर्वेपि प्राध्यापकाः एवं छात्र-छात्राः संस्कृत-शिक्षकाः, छात्राः, अभिभावकाः, अन्वेषकाः, संस्कृतानुरागिणः च उपस्थिताः आसन्। अस्य शिबिरस्य संचालकः आचार्यमहोदयः कार्यक्रमस्य सञ्चालनमकरोत् । अन्ते सर्वेभ्य सहभागकर्तृभ्यः सहभागिताप्रमाणपत्रेणाऽपि सभाजितम्।

**अस्माकं प्रेरणास्रोतः- स्व.पं० रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः**
**परामर्शकाः-डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारी, डॉ. राधेश्यामअवस्थी**
**सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलः- डॉ.सुन्दरनारायणझा, डॉ. सुरेन्द्रमहतो, डॉ. सन्नीकुमार, डॉ. संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,**

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।